# द्वितीयः पाठः प्रयागः

भारतवर्षस्य उत्तरप्रदेशराज्ये प्रयागस्य विशिष्टं स्थानमस्ति। अत्र ब्रह्मणः प्रकृष्टयागकरणात् अस्य नाम प्रयागः अभवत्। गङ्गा-यमुनयोः संगमे सितासितजले स्नात्वा जनाः विगतकल्मषा भवन्ति इति जनानां विश्वासः। अमायां पौर्णमास्यां संक्रान्तौ च स्नानार्थिनामत्र महान् सम्मर्दः भवति। प्रतिवर्षं मकरं गते सूर्ये माघमासे तु अनेकलक्षाः जनाः अत्र आयान्ति मासमेकमुषित्वा च संगमस्य पवित्रेण जलेन, विदुषां महात्मनामुपदेशामृतेन च आत्मानं पावयन्ति। अस्मिन्नेव पर्वणि महाराजः श्रीहर्षः प्रतिपञ्चवर्षम् अत्रागत्य सर्वस्वमेव याचकेभ्यो दत्त्वा मेघ इव पुनः सञ्चयार्थं स्वराजधानीं प्रत्यगच्छत्।

ऋषेः भरद्वाजस्य आश्रमः अपि अत्रैव अस्ति, यत्र पुरा दशसहस्रमिताः विद्यार्थिनः अधीतिनः आसन्। पितुः आज्ञां पालयन् पुरुषोत्तमः श्रीरामः अयोध्यायाः वनं गच्छन् 'कुत्र मया वस्तव्यम्' इति प्रष्टुम् अत्रैव भरद्वाजस्य समीपम् आगतः। चित्रकूटमेव त्वन्निवासयोग्यम् उचितं स्थानम् इति तेनादिष्टः रामः, सीतया लक्ष्मणेन च सह चित्रकूटम् अगच्छत्।

पुरा वत्सनामकमेकं समृद्धं राज्यमासीत्। अस्य राजधानी कौशाम्बी इतः नातिदूरेऽवर्तत। अस्य राज्यस्य शासकः महाराजः उदयनः वीरः अप्रतिमसुन्दरः ललितकलाभिज्ञश्चासीत्। यमुनातटे आधुनिक-'सुजावन'–ग्रामे तस्य सुयामुनप्रासादस्य ध्वंसावशेषाः तस्य सौन्दर्यानुरागं ख्यापयन्ति। प्रियदर्शी सम्राट् अशोकः कौशाम्ब्यामेव स्वशिलालेखमकारयत् योऽधुना कौशाम्ब्याः आनीय प्रयागस्य दुर्गे सुरक्षितः।

गङ्गायाः पूर्वं पुराणप्रसिद्धस्य महाराजस्य पुरुरवसः राजधानी प्रतिष्ठानपुरम् झूँसीत्याधुनिकनाम्ना प्रसिद्धमस्ति। यस्य प्रतिष्ठा अद्यापि विदुषां महात्मनाञ्च स्थित्या अक्षुण्णैव।

इतिहासप्रसिद्धः नीतिनिपुणः मुगलशासकः अकबरनामा दिल्ल्याः सुदूरे पूर्वस्यां दिशि- स्थितयोः कड़ाजौनपुरनामकयोः समृद्धयोः राज्ययोः निरीक्षणं दुष्करं विज्ञाय तयोर्मध्ये प्रयागे गङ्गायमुनाभ्यां परिवृतं दृढं दुर्गमकारयत् गङ्गाप्रवाहाच्चास्य रक्षणाय विशालं बन्धमप्यकारयत्, योऽद्यापि नगरस्य गङ्गायाश्च मध्ये सीमा इव स्थितोऽस्ति। अयमेव प्रयागस्य नाम स्वकीयस्य 'इलाही' धर्मस्यानुसारेण 'इलाहाबाद' इत्यकरोत्। इदं दुर्गमतीव विशालं सुदृढं सुरक्षादृष्ट्या च अतिमहत्त्वपूर्णमस्ति।

भारतस्य स्वतन्त्रतान्दोलनस्य इदं नगरं प्रधानकेन्द्रम् आसीत्। श्रीमोतीलालनेहरू, महामना मदनमोहनमालवीय, आजादोपनामकश्चन्द्रशेखरः, अन्ये च स्वतन्त्रतासंग्रामसैनिकाः अस्यामेव पावनभूमौ उषित्वा आन्दोलनस्य सञ्चालनम् अकुर्वन्। राष्ट्रनायकस्य पण्डितजवाहरलालस्य इयं क्रीड़ास्थली कर्मभूमिश्च।

राष्ट्रभाषा-हिन्दी-प्रचारे संलग्नं हिन्दीसाहित्यसम्मेलनम् अत्रस्थितम् अत्रैव च अनेकसहस्रसंख्यैः देशविदेशविद्यार्थिभिः परिवृतः विविधविद्यापारङ्गतैः विद्वद्वरेण्यैः उपशोभितः च प्रयागविश्वविद्यालयः भरद्वाजस्य प्राचीन-गुरुकुलस्य नवीनं रूपमिव शोभते। स्वतन्त्रेऽस्मिन् भारते प्रत्येकं नागरिकाणां न्यायप्राप्तेरधिकारघोषणामिव कुर्वन् उच्चन्यायालयः अस्य नगरस्य प्रतिष्ठां वर्द्धयति।

एवं गङ्गा-यमुना-सरस्वतीनां पवित्रसङ्गमे स्थितस्य भारतीयसंस्कृते: केन्द्रस्य च महिमानं वर्णयन् महाकवि: कालिदास: सत्यमेव अकथयत्–

**समुद्रपत्न्योर्जलसन्निपाते**
**पूतात्मनामत्र किलाभिषेकात्।**
**तत्त्वावबोधेन विनापि भूयस्-**
**तनुत्यजां नास्ति शरीरबन्ध:।।**

# अभ्यास प्रश्न

## ➡ लघु उत्तरीय प्रश्न

१. प्रयाग: कस्मिन् राज्ये वर्तते?
२. ऋषे: भरद्वाजस्य आश्रम: कुत्रास्ति?
३. राम: सीतया लक्ष्मणेन च सह कुत्र अगच्छत्?
४. वत्स-राज्यस्य राजधानी का आसीत्?
५. उदयनस्य राजधानी का आसीत्?
६. प्रयागे कयो: नद्यो: सङ्गम: अस्ति?
७. "कुत्र मया वस्तव्यम्" इति प्रष्टुम् श्रीराम: कस्य समीपम् आगत:?
८. हिन्दीसाहित्यसम्मेलनं कुत्र वर्तते (स्थितम्)?
९. झूँसीत्याधुनिक नाम्ना प्रसिद्धं पुरा किं नगरं कुत्र च आसीत्?
१०. भारतस्य स्वातन्त्र्यान्दोलनस्य प्रधानकेन्द्रं किम् नगरमभूत?
११. उत्तरप्रदेशस्य उच्चन्यायालय: कुत्र अस्ति?
१२. प्रतिष्ठानपुरम् वर्तमाने केन नाम्ना प्रसिद्धम् अस्ति?
१३. प्रयागे स्नानार्थिनां महान् सम्मर्द: कदा भवति?
१४. कस्य राज्यस्य शासक: उदयन: आसीत्?
१५. प्रयागस्य नाम 'प्रयाग:' कथम् अभवत्?
१६. सम्राट अशोक: स्वशिलालेखं कुत्र अकारयत्?
१७. गङ्गा-यमुनयो: संगम: कुत्र अस्ति?
१८. प्रयागस्य नाम 'इलाहाबाद' इति क: अकरोत्?

## ➡ अनुवादात्मक प्रश्न

१. **निम्नलिखित अनुच्छेदों का ससन्दर्भ हिन्दी-अनुवाद कीजिए–**

(क) राष्ट्रभाषा-हिन्दी-प्रचारे .................. प्रतिष्ठां वर्द्धयति।
(ख) ऋषे: भरद्वाजस्य ................................ अगच्छत्।
(ग) भारतवर्षस्य उत्तरप्रदेशराज्ये ................. प्रत्यगच्छत्।
अथवा भारतवर्षस्य ...................................... पावयन्ति।

अथवा अत्र ब्राह्मणः ...........................आत्मानं पावयन्ति।

(घ) पुरा वत्सनामकमेकं............................ ख्यापयन्ति।

(ङ) इतिहासप्रसिद्धः ...................... अतिमहत्त्वपूर्णमस्ति।

(च) समुद्रपत्न्योर्जलसन्निपाते...................... शरीरबन्धः।

(छ) भारतस्य...................................... कर्मभूमिश्च।

(ज) राष्ट्रभाषा-हिन्दी.................................. वर्द्धयति।

अथवा राष्ट्रभाषा ............................................ शोभते।

२. **निम्नलिखित सूक्तिपरक पंक्ति की ससन्दर्भ हिन्दी-व्याख्या कीजिए–**

(क) "तत्त्वावबोधेन विनापि भूयसतनुत्यजां नास्ति शरीरबन्धः।"

(ख) तनुत्यजां नास्ति शरीरबन्धः।

३. **निम्नलिखित वाक्यों का संस्कृत में अनुवाद कीजिए–**

(क) प्रयाग उत्तर प्रदेश राज्य में है।

(ख) यहाँ पर भरद्वाज का आश्रम है।

(ग) पुरुषोत्तम राम यहाँ आये थे।

(घ) प्रयाग में गङ्गा और यमुना का सङ्गम है।

(ङ) चन्द्रशेखर का उपनाम 'आजाद' था।

## ➡ व्याकरणात्मक प्रश्न

१. **निम्नलिखित शब्दों में सन्धि-विच्छेद कीजिए–**

तेनादिष्टः, झूँसीत्याधुनिक, नातिदूरे, योऽधुना।

२. **गङ्गायमुनयोः** तथा **सितासितौ** में विग्रह सहित समास बताइए।

## शब्दार्थ

**ब्रह्मणः** = ब्रह्मा के द्वारा। **प्रकृष्टयागकरणात्** = श्रेष्ठ यज्ञ करने के कारण। **सितासितजले** = श्वेत और श्याम जल में। **विगतकल्मषाः** = पापरहित। **सम्मर्दः** = भीड़। **पूतात्मनाम्** = पवित्र आत्मावाले। **अभिषेक** = स्नान। **कड़ा** = कौशाम्बी जनपद में पश्चिम की ओर गंगा तट पर स्थित एक स्थान जो मुगलकाल में एक सम्पन्न राज्य था। **पुरुरवा** = एक पौराणिक महान् राजा। **परिवृतः** = घिरा हुआ, युक्त। **विद्वद्वरेण्यैः** = श्रेष्ठ विद्वानों से। **समुद्रपत्न्योः** = समुद्र की दोनों पत्नियों अर्थात् गंगा और यमुना के। **भूयः** = पुनः। **तनुत्यजां** = शरीर त्याग करनेवाले।

●●